**PAPER - 3**

# MT

**2017 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - III**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

---

**प्रथमः विभागः - गद्यम् ।**

**प्र.१. अ) गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत। १
षष्ठाश्चर्यं ........... देशे विद्यते । (जॉर्डन / ब्राझिल / मेक्सिको )

(ii) पूर्णवाक्येन उत्तरत। १
सप्तमम् आश्चर्यं किम् ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत। १
पञ्चमम् आश्चर्यं मेक्सिको देशे विराजते ।

> पञ्चममाश्चर्यं नाम ब्राझिलदेशे 'रिओ-डिजानिरोनगरसमीपे पर्वतस्थः ख्रिस्त-दि-रिडिमर' इति पुत्तलः । रिडिमर नाम तारकः एषः क्रुसाकारे विराजते । मेक्सिकोदेशे विराजमाना 'मायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम् । अपि ज्ञायते त्वया यद् मायासंस्कृतिरतिप्राचीना विकसिता चासीत् । जार्डनदेशस्था प्राचीना नगरी पेट्रा आश्चर्यगणेषु सप्तमा । रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे विकसितैषा नगरी महत्त्वपूर्णं व्यापारकेन्द्रमासीत् । वस्तुतः एकैकमाश्चर्यमनुसृत्य अन्तर्जालतोऽनल्पं ज्ञातव्यमस्ति, किन्तु अद्याहं बहुकार्यव्यापृता। अतः अन्तर्जालतः यद्यधिकं ज्ञातव्यं स्यात्तर्हि एतानि सङ्केतस्थलानि निर्दिशामि - यथा www.wikipedia.com / www.answer.com आदीनि । तव प्रकल्पार्थं शुभाशंसाः। अधुना एतदेवालम् । अत्र विरमामि । शुभदिनम् ।

**२. स्वमतप्रकटनम् ।** २
पत्रप्रेषणाद् अन्तर्जालपत्रम् एव सन्देशप्रेषणस्य प्रभावशालि साधनं विद्यते इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १
शाकविक्रेता शाकविक्रय - अनुज्ञापत्रात् वञ्चितो भवति, यतः .......... ।
१) ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः भवति ।
२) ग्राहकः ग्राहकमञ्चम् अभिगच्छति ।

(ii) पूर्णवाक्येन उत्तरं लिखत । १

ग्राहकमञ्चः नाम किम् ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

परिमाणानां स्थाने पाषाणखण्डानाम् उपयोजनं विधियुक्तम् ।

मधुरा - अम्ब, नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति । परिमाणस्थाने पाषाणखण्डं योजयति ।

माता - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम्। तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम् ? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि ।

मधुरा - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः ।

माता - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते ।

२. **पृथक्करणम् ।** २

**स्तम्भपूरणं कुरुत ।**

| विधियुक्तम् | विधिविरुद्धम् |
|---|---|
| | |

(पाषाणखण्डानाम् उपयोगः, I.S.I. परिमाणानि, त्रुटिता तुला, अनुज्ञापत्रम्)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) चतुर्थपदं चित्वा लिखत । १

१) गतः : अतीतः :: सङ्कटम् : ................ ।

२) शरीरम् : अङ्गम् :: दर्शितवान् : ................ ।

(ii) मेलनं कुरुत । (विशेषण-विशेष्य) १

| | |
|---|---|
| १) आगताः | जन्तवः |
| २) क्षुद्राः | सर्वाङ्गम् |
| ३) सङ्कटमुक्तः | गुप्तचराः |
| ४) आच्छादितम् | अर्जुनः |

(iii) गद्यांशे आगते द्वे ल्यबन्त-अव्यये लिखत । १

दीर्घसमयोऽतीतः । अज्ञातवासकाले शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत् । निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः सः दृष्टवान् । सः व्यचिन्तयत्, ''अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत् । किं करणीयमधुना ।'' इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः । तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः । वृक्षे महान् कोटरः आसीत् । कोटरं प्रविश्य अर्जुनः तत्रैव निभृतः स्थितः। तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत् । अर्जुनमन्विष्यन्तः तत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः । एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान् ।

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) पिपीलिकानां अर्जुनं सहाय्यम् ।

(ii) गुप्तचराणां दर्शनेन अर्जुनः भीतः ।

(iii) सूर्यखगस्य मार्गदर्शनम् ।

(iv) अर्जुनेन कृतज्ञता प्रकटिता ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च ।।१।।
पारीनगर्याः खलु कण्ठभागे मालेव सीनाख्यनदी सुलग्ना ।
महासुखं यत्र जना लभन्ते नौकाविहारस्य तटभ्रमैश्च ।।२।।

१. **पृथक्करणम् ।** २

रोगाः अपहर्तारः सन्ति ।

| | | |
|---|---|---|
| आरोग्यस्य | | |

२. **शब्दज्ञानम् ।**

पर्यायशब्दयोः मेलनं कुरुत । १

| | |
|---|---|
| १) नौका | अ) कूलम् । |
| २) तटम् | ब) तटिनी । |
| | क) तरणिः । |

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ।।१।।
पात्रापात्रविवेको हि धेनुपन्नगयोरिव ।
तृणात्सञ्जायते क्षीरं क्षीरात्सञ्जायते विषम् ।।२।।

**१. अवबोधनम् ।**
पूर्णवाक्येन उत्तरत । १
वारि किमर्थं पिबेत् ?

**२. तात्पर्यलेखनम् ।** २
द्वितीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् । (केवलं १ श्लोकः लेखनीयः ।)** २
**सुभाषितं शुद्धं पूर्णं च लिखत ।**

i) याममध्ये ................ ०युग्माद्बलक्षयः ।।
ii) अद्रोहः ................ ०प्रशस्यते ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| १) उपवीतमलङ्कारं | न वेत्ति निर्बलः । |
| २) बली बलं वेत्ति | धृतमन्यैर्न धारयेत् । |
| ३) निशान्ते च पिबेद्वारि | त्रिभी रोगो न जायते । |
| ४) गुणी गुणं वेत्ति | स्रजं करकमेव च । |
| | न वेत्ति निर्गुणः |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | द्वितीया एकवचन | षष्ठी बहुवचन | पञ्चमी एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अनुसारिणः, सर्वम्, तस्मात्, पिपीलिकानाम्, तमः, अस्माकम्)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(संश्रयेत्, लभन्ते, कथयामास, अस्तु, प्राविशत्, दास्यति)

**इ) समासाः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत ।**

| | विग्रहवाक्यानि | समासनामानि |
|---|---|---|
| (i) | निषिद्धम् आचरणम् । | समाहार-द्वन्द्वः |
| (ii) | स्थानम् अनुसृत्य । | बहुव्रीहिः |
| (iii) | पात्रं च अपात्रं च एतयोः समाहारः । | अव्ययीभावः |
| (iv) | न भाषमाणः । | उपपद - तत्पुरुषः |
| (v) | पर्वते तिष्ठति इति । | नञ् - तत्पुरुषः |
| (vi) | करुणार्द्रं हृदयं यस्य सः । | कर्मधारयः |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) अथ अपरेद्युः उभौ तौ ........ प्रति आगतवन्तौ । (नागार्जुनं / नागार्जुनस्य / नागार्जुनेन)

(ii) जनसमाकुलात् ....... दूरं गत्वा सः मनः शान्तिमनुभवितुमैच्छत्। (नगरम्/नगरस्य/नगरात्)

(iii) अर्जुनस्य ....... उपरि काश्चन पिपीलिकाः वृक्षादपतन् । (हस्तम् / हस्तस्य / हस्तात्)

(iv) वस्तुतः ........ अनुसृत्य अन्तर्जालतः अनल्पं ज्ञातव्यम् अस्मि । (आदेशेन / आदेशम् / आदेशाय)

(v) अर्जुनः ....... प्राविशत् । (वनप्रदेशात् / वनप्रदेशं / वनप्रदेशस्य)

(vi) ........ बहिः मन्दिरम् अस्ति । (ग्रामस्य / ग्रामे / ग्रामात्)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) पापान्मुक्तिः = पापात् + ...... ।

(ii) ....... = तनुः + अग्रभागः ।

(iii) तद्यथार्थम् = ...... + यथार्थम् ।

(iv) ...... = तटभ्रमैः + च ।

(v) असावनुचितः = ...... + अनुचितः ।

(vi) चैतैः = च + ...... ।

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) सङ्गीते ........ स्वराः भवन्ति । (7)

(ii) ........ प्रमुखाः दिशः सन्ति । ($4^{th}$)

(iii) रघुवंशस्य ........ सर्गः दिग्विजयविषयकः । ($4^{th}$)

(iv) अस्यां कक्षायां ........ मञ्चः त्रुटितः । ($2^{nd}$)

(v) स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं ........ प्रयासः कृतः महाराष्ट्रेणैव । (first)

(vi) कबड्डीक्रीडायां सातत्येन ........ सुवर्णपदकं प्राप्य विश्वविक्रमः प्रस्थापितो भारतदेशेन। (thrice)

**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| आवां | राष्ट्रगीतं | रोचते। |
| शिक्षकाः | पुष्पाणि | गायन्ति। |
| सर्वे | संस्कृतभाषा | कुर्वन्ति। |
| मह्यम् | मार्गदर्शनम् | आनयाव। |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

एकदा सर्वे ग्रामस्थाः सम्मिल्य एकस्य ग्रामीणस्य ........ चर्चाम् अकुर्वन्। बहुभिः जनैः स प्रशंसितः। अन्ततः एकः जनः अवदत् सः उत्तमः जनः अस्ति, इत्यत्र नास्ति सन्देहः । परन्तु तस्मिन् द्वौ दोषौ ........ इति मे प्रतिभाति। तच्छ्रुत्वा अपरः अपृच्छत् कौ तौ दोषौ ? ज्ञातुम् इच्छामि। सः शीघ्रकोपी तथा कोपावेशे सः कार्याकार्यविवेकं न रक्षति। ........ यस्य विषये वार्तालापः प्रचलितः आसीत् स एव तत्र आगतः। अन्तिमं वाक्यं तस्य श्रवणपथे आपतितम्। स्वस्य आलोचकस्य ........ उत्पत्य ग्रीवया तं गृह्णन् सः अपृच्छत्, रे शठ, मां शीघ्रकोपी इति वदसि ? किं ते धार्ष्ट्यम्। तव कण्ठनोदनं करोमि अधुना। उपस्थिताः अन्ये जनाः तस्य रक्षणार्थं प्रयतमानाः अवदन्, भवान् स्वयमेव प्रमाणीकृतवान् यत् तस्य आलोचना न मिथ्या।

(उपरि, वर्तेते, संयोगवशात्, विषये)

**Best of Luck**